# INTERNATIONAL RESEARCH JOURNAL OF MANAGEMENT SOCIOLOGY & HUMANITIES

IRJMSH

**ISSN 2277 – 9809 (online)**
**ISSN 2348 - 9359 (Print)**

*An Internationally Indexed Peer Reviewed & Refereed Journal*

www.IRJMSH.com
www.isarasolutions.com

Published by iSaRa Solutions

## लोकान्तरगतिप्रस्तावः

**जिष्णुः. वि नम्पूतिरिः**

शोधच्छात्रः

मद्रपुरीसंस्कृतमहाविद्यालयः, चेन्नै

श्रीमेल्पत्तूर्नारायणभट्टपादैः कृते श्रीमन्नारायणीये ग्रन्थेस्मिन् लोकान्तरगति विषये यत् वर्णितम् तत् अत्र विवृणोमि ।तत्र लोकान्तरगतिविषये चतुर्थदशकस्य नवमश्लोकात् आरभ्य चतुर्थदशकस्य अन्तिमश्लोक पर्यन्तं विवरणं दृश्यते।तत्र आदौ अष्टाङ्गयोगविषये तत् सिद्धिविषये च विवृतम् अस्ति "कल्यतां मम कुरुष्वतावतीम्" इत्यादिना श्लोकेन इदं दशकम् आरभ्यते ।तत्र दशकस्य आरम्भे अष्टाङ्गयोगप्रकाराः उक्ताः विद्यन्ते। ते च प्रकाराः इत्थं वर्तन्ते – यमनियमप्राणायामप्रत्याहारधारणाध्यानसमाधयः इति ।एतादृश अष्टाङ्गयोगानुष्टानेन भगवत्प्रसादः भवतु इति दरकारम्भे भट्टपादैः प्रार्थना क्रियते ।प्रकृते लोकान्तरगतिविष□स्य अष्टाङ्गयोगस्य च कः सम्बन्धः इति चेत्, उच्यते यः अष्टाङ्गयोगेषु प्रवर्तते तस्य भगवतः अनुग्रहवशात् शीघ्रम् अर्चिरातिद्वारा लोकान्तर प्राप्तिः भवति इति । ततः क्रमेण मुक्तिः भवति । ननु एतादृशाष्टाङ्गयोगकरणे सति कथं लोकान्तर प्राप्तिः इति चेत्; उच्यते आदौ अष्टाङ्ग्योगस्य क्रमेण अनुष्टानं कर्तव्यम् इति श्लोके निबध्नाति –

तारमन्तरनुचिन्त्य सन्ततं
प्राणवायुमभियम्य निर्मलाः ।
इन्द्रियाणि विषयादथा
पहृत्यास्महे भवदुपासनोन्मुखाः ॥ ३ ॥
अस्फुटे वपुषि ते प्रयत्नतो
धारये धिषणां मुहुर्मुहुः ।
तेन भक्तिरसमन्तरार्द्रता
मुद्वहेम भवदङ्गिचिन्तका ॥ ४ ॥
विस्फुटावयवभेदसुन्दरं
त्वद्वपुः सुचिरशीलनावशात् ।
अश्रमं मनसि चिन्तयामहे
ध्यानयोगनिरतास्त्वदाश्रयाः ॥ ५ ॥
ध्यायतां सकलमूर्ति मीदृशीमुन्मिषन्मधुरताहृतात्मनाम् ।

सान्द्रमोदरसरूपमान्तरं

ब्रह्म रूपमयि तेऽवभासते ॥ ६ ॥

तत्समास्वदनरूपिणीं स्थितिं

त्वत्समाधिमयि विश्वनायक ।

आश्रिताः पुनरतः परिच्युता

वारभेमहि च धारणादिकम् ॥ ७ ॥

एतावत् पर्यन्तं अष्टाङ्गयोग विषये प्रत्यपादि । तदनु एतदृश समाधि विजयं प्रप्तवन्तः शुनकनारदादयः yeन मार्गेण गतवन्तः सः मार्गः ममापि भवतु इति आचार्यैः प्रर्थ्यते ।

इतः परं गति विषये प्रतिपादनं आरभ्यते ।

त्वत्समाधivिजये तु यः पुनर्मड्ड

मोक्षरसिकः क्रमेण वा ।

योगवश्यमनिलं षडाश्रयै

रुnnयत्यज सुषुम्नया शनैः ॥ ९ ॥

त्वत्समाधिविजये तु यः योगी, सः शीयं मुक्तो भवति उत क्रमेण वा मुक्तो भवति इति ।

तत्र आदौ कथं तस्य झटिति मोक्षः इति उच्यये । योगवश्यं अनिलं षडाश्रयैः सुषुम्नया उन्नयति । तत्र षडाश्रयाः के इत्युक्ते मूलाधारः, नाभिः, हृदयम्, उरः, तालुः, ब्रूमध्यम् इत्यादयः भवन्ति । तथा च सुषुम्नाद्वारा अनिलम् एतादृश - मोक्षरसिकः पुरुषः योगी उन्नयति ।

तदुत्तरम् आग्रहरहितः पुरुषः योगी सूक्ष्मशरीरं त्यत्क्त्वा परस्मिन् ब्रह्मणि लीयते । एतवता यस्य झटिति मोक्षः भवति तस्य विषये उक्तम् ।

अनन्तरं यः आग्रहयुक्तः पुरुषः सः क्रमेण मुक्तो भवति । यस्मात् सः ऊर्ध्वलोककुतुकी वर्तते तस्मत् एव सः मूर्धतो निरीयते । कथं निरीयते इत्युक्ते करणैः सार्धं निरीयते तत्र करणं नाम लिङ्गशरीरम् विवक्षितं –

लिङ्गदेहमपि सन्त्यजन्नथो

लीयते त्वयि परे निराग्रहः ।

ऊर्ध्वलोककुतुकी तु मूर्धतः

सार्धमेव करणैर्निरीयते ॥ १० ॥

एवं लिङ्गशरीरं च,

पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् ।

अपञ्चीकृतभूतोत्थं सुक्ष्मलिङ्ग भोगसाधनम् ।।

इति श्लोकन्तरेण वर्णितं एवम् अत्रापि स्वीकर्तव्यं ।

इदMeव ब्रह्मसूत्रे चतूर्थाध्याते द्वितीयपादे विचार्य निर्नीतं । तत्र हि प्रथ्मे अधिकरणे वागधिकरणे इदं विष्यवक्यं भवति – "अस्य सोम्य पुरुषस्य प्रयतो वाड्यानसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यं देवतायम्" इति ।

अत्र वृत्ति सहितस्य वचः मनसि लयो भवति वा उत केवलायाः वृतेः इति सन्देहे, वागेव तावत् मनसि सम्पद्यते इति पूर्व पक्षः प्राप्तः । तत्र सिद्धान्तिना उच्यते वाग्वृत्तिरेव मनसि सम्पद्ध्यते इति । एवं द्वितीयाधिकरणे अस्मिन एव वाक्ये मनः प्राणे इत्यंशे सन्देहः किं मनोवृत्तिरेव प्राणे संपद्यते इति पूर्वपक्षे प्राप्ते तस्यापि मनसः वृत्तिद्वार एव प्राणे लयः, न तु स्वरूपेण इति निर्णीतं "तन्मनः प्राणे उत्तरात्" इत्यनेन सूत्रेन ।

एवं अग्रिमाधिकरणे हि प्राणस्य तेजसि लयं आशय अध्यक्षे जीवे लयः निर्णीतः । अनन्तरं च विद्वदविद्वत्भेदेन उत्क्रान्तिक्रमस्य भेदो नस्ति इति निर्णीतं चतुर्थधिकरणे ।

अग्निवासरवलक्षपक्षगै
रुत्तरायणजुषा च दैवतैः ।
प्रापितो रविपदं भवत्परो
मोदवान् ध्रुवपदान्तमीयते ॥ ११ ॥

अग्निः, वासरो नाम दिवाकालः वलर्क्षपक्षोनाम शुक्लपक्षः तादृशशुक्लपक्षगैः देवतैः उत्तरायणजुश च देवतैः इत्यर्थः । तत्र एतदृशगमने देवता करणं भवति । देवतया रविपदं प्राप्तो भवति योगी ततः तस्य ध्रुवलोकप्राप्तिः भवति ।

आस्थितोऽथ महरालये
यदा शेषवक्त्रदहनोष्मणाद्येते ।
ईयते भवदुपाश्रयस्तदा
वेधसः पदमतः पुरैव वा ॥ १२ ॥

पूर्व ध्रुवलोकप्रप्तिः भवति इति उक्तं, अनन्तरं ततः महर्लोकप्राप्तिः भवति इति उच्यते । तत्र महर्लोकप्राप्तिः यदा भवति तदा शेषवक्त्रदहनोष्मणा – शेषः नम नाग विषेशः, तादृशनागविशेषस्य मुखे दाहः अस्ति । दाहस्य ऊष्मणा सह अस्य योगिनः सं□□□□ः भवति । तेन शेषवक्त्रदहनोष्मणा तस्य पीडा भवति ।

ततः ईश्वाराणुग्रहवशात् महर्लोकात् ब्रह्मलोकप्राप्तिहि भवति इति उक्तम्; अनेन ईश्वरस्य स्तुतिः क्रियते । कथं ? शेषवक्त्रदहनोष्मणा यदा पीड्यते तदा भगवन्तं शरणं प्राप्यैव तस्य ब्रह्मलोक प्रप्तिः इति भगवतः स्तुतिः प्रतीयते । अतः भगवतः स्तुतौ तात्पर्यम्, न तु पीडाभवतीत्यत्र तात्पर्यं ।

तत्र वा तव पदेऽथवा वसन्
प्राकृतप्रलय एति मुक्तताम् ।
स्वेच्छया खलु पुरा विमुच्यते

संविभिद्य जगदण्डमोजसा ॥ १३ ॥

तत्र ब्रह्मलोके उत भवत्पदे वसति योगी । यदा प्राकृतप्रलयो भवति तदा सः मुक्ततां प्राप्नोति । प्राकृतप्रलयात् मोक्षोभवति अथवा प्राक् एव तस्य मोक्षो भवति । कथं ? स्वस्य योगशक्त्या सः प्राकृतप्रलयात् प्राक् एव मुक्तो भवति इत्याशयः ।

तस्य च क्षितिपयोमहोऽ

निलद्योमहत्प्रकृतिसप्तकावृतीः ।

तत्तदात्मकतया विशन् सुखी

याति ते पदमनावृतं विभो ॥ १४ ॥

पृथिवी, आपः, तेजः, वायुः, आकशः, महत्तत्वं, मया इत्यदयः सप्तकावृतयः । तादृशीः सप्तकावृतीः प्राप्य इत्युक्तं । तत्र प्राप्तिः इत्यनेन तत्तदधिपतयः वा भवन्ति; तत्र प्राप्तिः इत्यनेन नियामकत्वं इत्यर्थः किमर्थ स्वीकृतः इत्युक्ते एतादृशसप्तकावृतीभिः साकं पूर्वमेव सं[illegible]ः आसीत् ।

इदनीं नियम्यनियामकभावसंबन्धः भवति सः संबन्धः पूर्व नासीत् इति तयोः भेदः भवति । अतः एतादृशीः सप्तकावृतीः प्राप्य सः सुखं प्राप्नोति । स्वरूप सुखं अनुभवति इत्याशयः । एतादृशीं अर्चिरादिगतिं यः प्रप्नोति तस्य पुनरावृत्तिः न भवति । जननमरणदुखरूपसम्सारे अस्य सम्बन्धो न भवति, सः अवश्यं मुक्तो भवति इत्याश्यः ।

तदुक्तं,

अर्चिरादिगतिमीदृशीं व्रजन्

विचुर्तिं न भजते जगत्पते ।

सच्चिदात्मक भवत् गुणोदया

नुच्चरन्तमнилेश पाहि माम् ॥ १५ ॥

एवं अर्चिरादिमार्गे च प्रमाण भूता श्रुतिः भवति – “तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरहन आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षड्डुदङ्डेति मासागँस्तान् “ ।। १ ।।

“मासेभ्यः संवत्सरगँ संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान्ब्रह गमयत्येष देवयानः पन्था” इति || २ ||

अत्र च आदित्यादयः अधिष्ठातृदेवताः एव विवक्षिताः, न तु तत्लोकाः इति निर्णीतं ब्रह्मसूत्रे चतुर्थाध्याये तृतीय पादे ।

## ISARA INSTITUTE OF MANAGEMENT & PROFESSIONAL STUDIES




RSEARCH GATEWAY







AROGYAM ONLINE

## PARIVARTAN PSYCHOLOGY CENTER






**भारतीय भाषा, शिक्षा, साहित्य एवं शोध**
**ISSN 2321 – 9726**
**WWW.BHARTIYASHODH.COM**

**INTERNATIONAL RESEARCH JOURNAL OF MANAGEMENT SCIENCE & TECHNOLOGY**
**ISSN – 2250 – 1959 (0) 2348 – 9367 (P)**
**WWW.IRJMST.COM**

**INTERNATIONAL RESEARCH JOURNAL OF COMMERCE, ARTS AND SCIENCE**
**ISSN 2319 – 9202**
**WWW.CASIRJ.COM**

**INTERNATIONAL RESEARCH JOURNAL OF MANAGEMENT SOCIOLOGY & HUMANITIES**
**ISSN 2277 – 9809 (0) 2348 - 9359 (P)**
**WWW.IRJMSH.COM**

**INTERNATIONAL RESEARCH JOURNAL OF SCIENCE ENGINEERING AND TECHNOLOGY**
**ISSN 2454-3195 (online)**

**WWW.RJSET.COM**

**INTEGRATED RESEARCH JOURNAL OF MANAGEMENT, SCIENCE AND INNOVATION**
**ISSN 2582-5445**

**WWW.IRJMSI.COM**

**JOURNAL OF LEGAL STUDIES,POLITICS AND ECONOMICS RESEARCH**

**WWW.JLPER.COM**